# Government General Degree College at Ranibandh

## Rautora, Ranibandh, Bankura - 722135

## Sanskrit Department

## Study Material for GE

## 2nd Year 4th Semester

## Paper – Manusamhita 7th Chapter & Ishopanishad (GE-4)

## Unit 2 - Ishopanishad

# ईशोपनिषद्

### १) ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
### तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्।।१।

**प्रसङ्गनिर्देशः –** अयं मन्त्रः शुक्लयजुर्वेदस्य अन्तर्गतायाम् ईशोपनिषदि समाम्नायते। अनेन मन्त्रेण उपनिषच्छास्त्रस्य मूलं तत्त्वं व्याख्यातम्। अस्मिन् जगति सर्वेषु द्रव्येषु परमात्मा विराजते। विषयवासनापरित्यागेन परमेश्वरस्य सत्ता समुपलभ्यते।

**सान्वयार्थाः –** ईशा ईष्टे इति ईट् परमेश्वरः परमात्मा सर्वस्य, तेन वास्यम् आच्छादनीयं यत्किञ्च जगत्यां जगत् सर्वमेव चराचरम् इदं सर्वं विद्यमानम्। तेम तदर्थं त्यक्तेन एषणापरित्यागेन भुञ्जीथाः पालयेथाः, त्यक्तैषणः त्वं कस्यस्विद् कस्यचित् परस्य स्वस्य वा धनं मा गृधः मा काङ्क्षीः इति सान्वयार्थाः।

**व्याख्यानम् –** "सर्वं खल्विदं ब्रह्म" इति उपनिषद उद्घोषः। अस्मिन् मन्त्रे प्रतिपाद्यते यद् जगति सर्वस्मिन्नेव वस्तुनि ब्रह्म वर्तते। तद् ब्रह्म सर्वम् ईष्टे। सर्वेषां प्राणिनाम् आत्मा सन् प्रत्यगात्मतया स सर्वम् आच्छादयति। जगति विद्यमानं सर्वमेव वस्तु अनृतम्। "अहमेवेदं सर्वम्" इति परमार्थसत्यरूपेण तत्सर्वम् आच्छाद्यते ब्रह्मणा। नामरूपादिविहीनं ब्रह्म जागतिकवस्तुमाध्यमेन रूपमयं भवति। चन्दनागुर्वादिकं यदा जलसम्बन्धं लभते तदा तस्मिन् क्लेदादिजम् औपाधिकं दौर्गन्ध्यं समुत्पद्यते। परन्तु तस्य स्वरूपनिघर्षेण यः पारमार्थिकः गन्धः आगच्छति तद् दौर्गन्ध्यम् आच्छादयति। एवमेव आत्मनि अध्यस्तस्य कर्तृत्वभोक्तृत्वादिलक्षणस्य सर्वस्य एव नामरूपकर्माख्यस्य विकारजातस्य परमार्थभावनया त्यागः भवेत् इति उपदिशति मन्त्रः। जगति एषणात्रयं विद्यते – पुत्रैषणा वित्तैषणा लोकैषणा च। एषणात्रयस्य त्यागपूर्वमेव ब्रह्मजिज्ञासुः ब्रह्मज्ञानी आत्मनः पालनं कुर्यात्। आत्मा एव इदं सर्वम् इति भावनया अपरस्य स्वस्य वा धने लोभं ब्रह्मजिज्ञासुः न कुर्याद् इति मन्त्रस्य व्याख्यानम्।

### २) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
### एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।१।

**प्रसङ्गनिर्देशः –** अयं मन्त्रः शुक्लयजुर्वेदस्य अन्तर्गतायाम् ईशोपनिषदि समाम्नायते। ब्रह्मज्ञानाय निष्कामकर्मसम्पादनस्य अस्ति प्रयोजनम् इति वर्णयति अयं मन्त्रः।

**सान्वयार्थाः –** इह अस्मिन् जगति कर्माणि अग्निहोत्रादीनि कुर्वन् एव सम्पादयन् एव शतं समाः शतसंख्यकान् संवत्सरान् जिजीविषेत् जीवितुम् इच्छेत्। एवम् अनेन प्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्माद् अग्निहोत्रादीनि कर्माणि कुर्वतः वर्तमानात् प्रकाराद् अन्यथा प्रकारान्तरं न अस्ति, येन येन प्रकारेण कर्म अशुभं कर्म न लिप्यते इति सान्वयार्थाः।

**व्याख्यानम् –** सकामस्य कर्मणः अनुष्ठानेन शुभाशुभफलं मानवः लभते। नरः संसारपाशेन आबद्धो भूत्वा पुनः जन्म गृह्णाति। अत एव सकामकर्ममार्गं त्यक्त्वा निष्कामकर्मसम्पादने साधकानां ब्रह्मज्ञानिनां स्वत एव प्रवृत्तिः जायते। अत्र उपदिशति शास्त्रविहितानि अग्निहोत्रादीनि कर्माणि एव कार्याणि। तानि कुर्वन्नेव एषणात्रयमुक्तः पुनः आबद्धः न भवति। यदि तानि परित्यज्य

अन्यत्कर्म क्रियते तदा एव नरः अशुभेन कर्मणा लिप्तो भवति। शास्त्रविहितकर्माचरणेन एव ब्रह्मभावना उदेति, तेन चित्तशुद्धिः जायते। चित्तशुद्ध्या च जननमरणरूपचक्रात् क्रमशः ब्रह्मज्ञानी भूत्वा मोक्षं लभते। अतः शास्त्रविहितानि एव कर्माणि कार्याणि।

**३) तदेजति तन्नैजति तद्दूरे तद्वदन्तिके।**

**तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।५।**

**प्रसङ्गनिर्देशः –** अयं मन्त्रः शुक्लयजुर्वेदस्य अन्तर्गतायाम् ईशोपनिषदि समाम्नायते। अत्र ब्रह्मणः अस्तित्वं प्रतिपाद्यते

**सान्वयार्थाः –** तद् आत्मतत्त्वं यत् प्रकृतं तत् एजति चलति, तदेव च न एजति स्वतो नैव चलति स्वतः अचलमेव चलति इव भाति। किं च तद् दूरे वर्षकोटिशतैः अपि अविदुषाम् अप्राप्यत्वाद् , तद् समीपे अत्यन्तमेव, तद् अन्तः अभ्यन्तरे अस्य सर्वस्य जगतः, तद् उ अपि सर्वस्य अस्य जगतः बाह्यतः बहिर्भागे इति सान्वयार्थाः।

**व्याख्यानम् –** पूर्वस्मिन् अनेजदेकं मनसो जवीयः इत्यस्मिन् मन्त्रे समाम्नातं यत् स्वरूपतः निश्चलः सन्नपि आत्मा मनसः अपि वेगवान्। अस्मिन् मन्त्रे आत्मनः धर्माः वर्ण्यन्ते। आत्मतत्त्वं हि सर्वव्यापि। तत् कदाचित् चलति इति प्रतीयते, कदाचिच्च न चलतीति प्रतीयते। तद् हि ब्रह्मज्ञानिनां शुद्धचित्तानां समीपे, संसारे मोहग्रस्तानां हि दूरे तिष्ठति। "य आत्मा सर्वान्तरः" इति श्रुतेः नामरूपक्रियात्मकस्य अस्य जगतः मूलभूतं बाह्यतश्च तदेव। तद् आत्मतत्त्वं व्यापकत्वाद् आकाशवद् अतिशयसूक्ष्मत्वाद् अन्तः एव।

**४) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।७।**

**प्रसङ्गनिर्देशः –** अयं मन्त्रः शुक्लयजुर्वेदस्य अन्तर्गतायाम् ईशोपनिषदि समाम्नायते। अत्र ब्रह्मज्ञानी शोकमोहविरहितः भवति इति वर्ण्यते

**सान्वयार्थाः –** यस्मिन् काले सर्वाणि भूतानि आत्मा एव अभूद् अभवत् परमार्थवस्तु विजानतः तत्र तस्मिन् काले तत्रात्मनि वा को मोहः कः शोकः। एकत्वम् आत्मैकत्वम् अनुपश्यतः साक्षात्कुर्वतः, शोकमोहादिकं नास्त्येव इति सान्वयार्थाः।

**व्याख्यानम् –** यस्य ब्रह्मसाक्षात्कारो भवति तस्य दृष्ट्या तदा सर्वाणि एव भूतानि ब्रह्मस्वरूपाणि। तस्मिन् काले तस्य अविद्यानाशात् तन्मूलकयोः शोकमोहयोः अपि नाशो भवति। आत्मज्ञस्य पुरुषस्य कदापि शोकः मोहश्च न भवति। तस्य तदा संसार एव उच्छिन्नः भवति। स न पुनः जननमरणचक्रे पतति।

**५) विद्यां चाविद्याञ्च यस्तद्वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।७।**

**प्रसङ्गनिर्देशः –** अयं मन्त्रः शुक्लयजुर्वेदस्य अन्तर्गतायाम् ईशोपनिषदि समाम्नायते। विद्याविद्ययोः भिन्नानुष्ठानं परित्यज्य सहानुष्ठानमेव साधकेन कर्तव्यम् इति उपदिशति मन्त्रः।

**सान्वयार्थाः –** यः साधकः विद्यां देवताज्ञानं च अविद्यां कर्म च एतद् उभयं सह एकेन पुरुषेण अनुष्ठेयं वेद जानाति सः अविद्यया अग्निहोत्रादिना कर्मणा मृत्युं स्वाभाविकं कर्मज्ञानं तीर्त्वा अतिक्रम्य विद्यया देवताज्ञानेन अमृतं देवतास्वरूपं अश्नुते प्राप्नोति इति सान्वयार्थाः।

**व्याख्यानम् –** यः साधकः शास्त्रविहितं अविद्यारूपं कर्म जानाति तस्य सविधे यद् दुःखम् आयाति, तस्मात् तस्य परित्राणं भवति। यः खलु साधकः विद्यां देवताज्ञानम् उपासते स देवात्मभावं प्राप्नोति। अतः उभयं य उपासते स एव स्वाभाविककर्मचक्राद् दुःखाद् मुक्तो भूत्वा देवात्मभावं प्राप्नोति इति उभयोपासना कार्या इति उपदिशति मन्त्रः।